X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

SK/

Manuscripts Library
S.D.P.B.
Coll. No. 72

Title NAMAPARAYANA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 72 Subject : Tantra

Title : Rāma pārāyana

Author : — Scribe : —

Date of the work : — Date of the Ms. : V.S. 1743

Place of the work : Place of the Ms. :

Size : 4.24 x 4.2" Extent : 3 foll.

Language : Sanskrit Script : Devanagari.

Remarks : Complete

ॐ श्रीगुरुभ्यो नमः ॥ अथ नामपारायणं लिख्यते ॥ आद्यैरत्र चितैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः काद्यैः क्षान्तगतैः स्व
रादिभिरथ क्षान्तैश्च तैः सस्वरैः ॥ नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगुह्यानि ते तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः
परेभ्यो नमः ॥१॥ अथैवं कृतप्रातःसंध्यावंदनादिक्रियः स्वगुरूपदिष्टविधिना षट्त्रिंशदुत्तरसप्तशताधिकविंशतिसहस्र
संख्याभिः कालनित्याविद्याभिः सहमूलविद्यायाः पारायणजपं कुर्यात् ॥ कालनित्याविद्यास्तु नित्यातंत्रोक्ताः उद्ध्रियंते त
त्र अकारादिक्षकारांताः षट्त्रिंशत्तत्त्ववर्णाः षोडशनित्याभिः प्रत्येकं नियोजिताः षट्सप्तत्युत्तरपंचशतसंख्याकाः प्रणमंत्रात्मका
वर्णा भवंति ॥ एते वर्णाः कालनित्याविद्यानां प्रागुक्तसंख्यानां एकैको वर्णः षट्त्रिंशद्विद्यानां आदिवर्णः इति सर्वे वर्णा वी
जवाः भवंति ॥ ईकारस्तु सर्वासां विद्यानां शक्तिकूटारब्धस्तृतीयवर्णो भवति ॥ अथैताः विद्याः पारायणपरिपाटी अत्र
दृश्यंते ॥ तत्र साधको विविक्ते निद्यास्त्रीरैए(?) कांते स्थिरदेवास्वासनमास्तीर्य ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः
इत्यासनं संपूज्य तत्र प्राङ्मुखः स्वस्तिकाद्यासनेनोपविश्य ॥ गुरुं गणपतीष्टदेवताः प्रणम्य प्राणायामत्रयपूर्वकं संक
ल्पतो भूतशुद्धिं प्राणप्रतिष्ठां च विधाय ऋष्यादिकरषडंगं बमातृकान्यासं च विधाय मस्तकदृग्बाहूमूलादिषट्त्रिं
शत्स्थानेषु प्रतिस्थानं षोडशदलपद्मं विभाव्य तत्र अकारादिक्षकारांतान् षट्त्रिंशत्तत्त्ववर्णान् षोडशस्वरैः संयुक्तान्
विभाव्य मध्ये तत्त्वरूपमाद्यवर्णं विन्यस्य पूर्वादिदलेषु तत्तदक्षरविकृतषोडशस्वरान् तदादिकान्विन्यसेदित्येवं पूर्णमं
डलवर्णान्विन्यस्य ततः शिरसि दक्षिणामूर्तिऋषये नमः ॥ मुखे पंक्तिछंदसे नमः ॥ हृदि श्रीराजराजेश्वरीमहात्रिपुरसुं

पुनः ता॰ मूलं अकाई॰ पुनः ता॰ मू॰ आकाई पुनः ता॰ मू॰ आखाई॰ इत्युक्तरीत्या आक्षाई इत्यंतं जपित्वा पुनः ता॰ मू॰ लं इ आ
ई पुनः ता॰ मूलं इकाई पुनः ता॰ मू॰ इखाई॰ इति क्रमेण इक्षाई॰ इत्यंतं जप्त्वा पुनः ता॰ मू॰ ई आई॰ पुनः ता॰ मू॰ ईकाई
पुनः ता॰ मू॰ ईखाई॰ ॥ इति क्रमेण ईक्षाई इत्यंतं जप्त्वा पुनः ता॰ मू॰ उ आई॰ पुनः उकाई॰ इति क्रमेण उक्षाई इत्यंतं
जप्त्वा पुनः ता॰ मूलं ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं [illegible] पुनः ता॰ मू॰ अः आई पुनः ता॰ मूलं अः काई॰ पुनः ता॰ मूलं अः खा
ई॰ पुनः ता॰ मू॰ अः गाई ॥ इति अः क्षाई पर्यंतं जपेत् ॥ तदा मूलविद्यायाः षट्सप्तपंचशतसंख्याको जपो भवति ॥ ए
वं जपं कृत्वा पूर्वोक्तगुरुपादुकाविद्यां रूपिणी विद्यां ग्नीर्णविद्यां ॐ ह्रीं मम सकलमनोरथान् साधय साधय तुभ्यं नमः इ
ति त्रार्पणं विद्यामप्येकवारं जप्त्वा इदं स्तोत्रं पठेत् ॥ हस्तां बुसिरणखार्कैर्दुयष्टिप्राययुगस्वरैः ॥ मातृभैरवगां वंदे देवीं त्रि
पुरभैरवीं ॥१॥ कादिवर्गाष्टकाकारसमस्ताष्टकविग्रहां ॥ अष्टशक्त्यावृतां वंदे देवीं ॥२॥ स्वरषोडशकानां तु षट्त्रिंशद्भिः परा
परैः ॥ षट्त्रिंशत्तत्त्वगां वंदे देवीं ॥३॥ षट्त्रिंशत्तत्त्वसंस्थाप्ये शिवचंद्रकलास्वपि ॥ कादितत्त्वांतरां वंदे देवीं ॥४॥ आत्ममाया
द्वयोपाधिविचित्रेंदुकलावतीं ॥ सर्वात्मिकां परां वंदे देवीं ॥५॥ षडध्वयोनिपीठस्थां मंत्रत्रयकुंडलीं ॥ लिंगत्रयात्मिकां
वंदे देवीं ॥६॥ स्वयं नेदृशां(?) बाणेक्षुकामां न स्थिततरां ॥ प्राप्तप्रत्यक्चितिं वंदे देवीं ॥७॥ अक्षरांतर्गताशेषनामरू
पक्रियापरां ॥ शक्तिं विश्वेश्वरीं वंदे देवीं त्रिपुरभैरवीं ॥८॥ वर्गांते पठितव्यं स्यात् स्तोत्रमेतत्समाहितैः ॥ दिनतो वारतो
पक्षान्मासात् षट्त्रिंशता दिनैः ॥९॥ जपतो वारमेकं तु नित्याविद्यात्मिकास्तुयः ॥ आयुरारोग्यमैश्वर्यं विजयं वांछितं क्र
मात् ॥१०॥ इति स्तुत्वा प्रणम्य दिननित्याविद्यया सहमूलविद्यायाः प्राणायामत्रयं कुर्यात् तत्कृतं जपं देवी समर्पयेत् ॥

दत्रीदेवतायै नमः॥ आधारे ऐं बीजाय नमः॥ पादयोः सौः शक्तये नमः॥ हृदि क्लीं कीलकाय नमः॥ मम श्रीराजराजेश्वरी महात्रि
पुरसुंदरी प्रसादसिद्ध्यर्थे नामपारायणे विनियोगः॥ ततः मूलेन खंडत्रयेण करषडंगन्यासं चतुरासनन्यासं च नूः पी
ठन्यासं चतुस्तत्वन्यासं वाग्देवताष्टकन्यासं च विधाय ध्यायेत्॥ रक्तां रक्तांबरां रक्तस्रग्विभूषानुलेपनां॥ पाशांकु
शेक्षुकोदंडप्रसूनविशिखां स्मरेत्॥ इति कालनित्यां हृदये ध्यात्वा मानसैरुपचारैः संपूज्य पारायणं जपमारभेत॥
तत्रादौ अंगविद्याजपः॥ तारत्रयं मूलं अं हसौ हंसः॥ पुनः तारत्रयं मूलं आं हसौ हंसः॥ पुनः ता॰ मू॰ इं हसौ हंसः॥ पु
नः ता॰ मू॰ ईं हसौ हंसः॥ इत्युक्तरीत्या उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः॥ इति षोडशस्वरैः सह जप्त्वा पुनः तारत्रयं मूलं
कं हसौ हंसः पुनः ता॰ मू॰ खं हसौ हंसः॥ इति क्षं पर्यंतं एकपंचाशद्विद्याभिः सह मूलविद्यां जपित्वा केवलमूलविद्यां त्रि
वारं जपित्वा अथ श्रीगुरुपादुकाविद्यां एकवारं जपित्वा ऐं ह्रीं श्रीं ह्स्ख्फ्रें ह्सौः हसक्षमलवरयूं सहक्षमलवरयूं अमुका
नंदनाथ ... श्री ... सुंदरी अंबा श्रीपादुकां पूजयामि नमः॥ इति गुरुपादुकां एकवारं जपित्वा॥ ऐं वदव
द वाग्वादिनि ... इति दीपिनी विद्यां एक
वारं जपित्वा ... इति ... विद्यामप्येकवारं जपित्वा कालनित्याविद्याभिः सह
मूलविद्यां प्रोक्तक्रमेण जपेत्॥ अथात्रादौ साधकः प्रथमं तद्दिनाक्षरविद्योत्पकालनित्याविद्याभिस्सह मूलविद्यां जपि
त्वा पश्चात्तद्युगाक्षरजनितविद्याभिः तावत्संख्याभिः प्रोक्तक्रमेण मूलविद्यां जपेत्॥ तद्यथा॥ तारत्रयं मूलं अकाए
हंसः पुनः तारत्रयं मूलं अकाई हंसः पुनः ता॰ मू॰ अखाई॰ पुनः ता॰ मू॰ अगाई हंसः॥ इति अक्षाई इत्यंतं जपित्वा॥

त्रयं मूलं खआई॰ पुनः ता॰ मू॰ खकाई॰ पुनः ता॰ मूलं खखाई पुनः ता॰ मू॰ खगाई॰ इति क्रमेण ता॰ मू॰ खक्षाई इत्यंतं जपि
त्वा पुनः ता॰ मू॰ खा आई॰ इति खि खी खु खू खृ खॄ खॢ खॣ खे खै खो खौ खं खः पर्यंतं जपेत्तदा मूलविद्यायाः षट्स
प्तत्युत्तरपंचशतसंख्याको जपो भवति॥ इति पूर्वोक्तरीत्या वर्गद्वयस्यापि अंते स्तोत्रपाठं कुर्यात्॥ इत्युक्तरीत्या चतुर्थदिने
ङवर्गः पंचमदिने चवर्गः ६ छवर्गः ७ जवर्गः ८ झवर्गः ९ ञवर्गः १० टवर्गः ११ ठवर्गः १२ डवर्गः १३ ढ १४ ण १५ त १६ थ १७ द १८ ध १९ न २० प २१ फ २२
ब २३ भ २४ म २५ य २६ र २७ ल २८ व २९ श ३० ष ३१ स ३२ ह ३३ ळ ३४ क्ष ३५ एवं प्रोक्तरीत्या षट्त्रिंशद्दिनेषु संपूर्णो भवति तत्र
द्वितीयाणप्रतिष्ठां ... न्यासं पूर्ववत् ... वर्णन्यासं च विधाय ध्यायेत् रक्तां रक्तांबरामिति ततः अंगविद्यां जपित्वा
पूर्वोक्तगुरुपादुकाविद्यां दीपिनीविद्यां ... विद्यां ... विद्यां जपित्वा तारत्रयं मू॰ कंकाई॰ पुनः ता॰ मू॰ कंकाई॰
पुनः ता॰ मू॰ कः खाई एवं क्रमेण ... इत्यंतं जपेत्तदा मूलविद्यायाः षट्सप्तत्युत्तरपंचशतसंख्याको जपो भवति॥ युगाक्षरोत्थ
विद्याभिः क्रमेण मूलविद्या सहिता विसर्गांतविद्याभिः सह जपेत् वर्गद्वयस्यापि अंते स्तोत्रपाठं कुर्यात्॥ एवं षट्त्रिंशद्दिने परिपक्व
रीत्या प्रत्यहं क्रियमाणे सति तदा सर्वं मिलित्वा षट्त्रिंशदुत्तरसप्तसताधिकविंशतिसहस्रसंख्याको जपो भवति॥ मूलविद्यायाः
दिनतद्युक्त्यादिजपः केवलं कालनित्याविद्यानामेव ... तु समारभ्य मध्यरात्रौ समापयेत्॥ वारेषु चैकदा जापे प्रथमे रविवा
रे कौ वाशिन्या प्रथमे वर्गे कामेश्वर्या द्वितीयके जप्त्वा वर्गद्वयं मंत्री सोमवारादिषट्स्वपि दिनेषु मोदिनी वर्गादिकेकं जपेत्सुधीः॥
पक्षेषु चैकदा जापे प्रथमादितिथिषु ... विद्यास्तु प्रजपेत्तिवासरे ... पंचमी दशमी पंचदशी तिथिषु क्रमात्॥ पू
र्णासु द्विद्वियोन्यु ... जपेत् षट्स्वपि तान्क्रमात्॥ षट्त्रिंशद्दिनेष्वेवमेकैकां योनिमेव तु पूर्णासु प्रजपेद्विद्याः ... पंक्तिनवाः सुधीः
मासे प्रतिदिनं विद्वान् एकैकां योनिमेव तु॥ जपेन्नानिदिनं विद्वान् एवं पूर्णं निवर्तिता॥ नेमा निस्स दशी विद्या कापि लोकेषु विद्य ३
ते॥ आयुरारोग्यमैश्वर्यं विजयं वांछितं क्रमात्॥ ॥ ॥ इति नामपारायणं समाप्तं॥ ॥ ॥ ...

युगाक्षरो ऽस्य विद्याजपे यस्मिन् युगे यत्स्वरयुतं युगाक्षरं भवति तत्स्वरमारभ्य प्रतिस्वरं तद्विसर्गांतिमं विद्यावधि जपि
त्वा पुनस्तदक्षरस्य प्रथमस्वरमारभ्य आरब्धस्वरस्य पूर्वस्वरांतं विद्यावधि जपेत्। तदा षट्त्र्युत्तर पंचशत संख्याको
जपो भवति॥ मूलविद्यायाः अंगविद्या गुरुपादुका विद्या दीपिनी विद्या उत्तीर्णविद्या एताः विद्याः वर्गद्वयस्याप्या
दौ प्रत्यहं कार्याः। वर्गद्वयस्याप्यंते स्तोत्रपाठं कुर्यात्॥ इति प्रथमदिनकृत्यं॥ अथ द्वितीयदिने ऋष्यादिकरषडंग
न्यासं भूतशुद्धिं प्राणप्रतिष्ठां वाग्देवताष्टकन्यासान् पूर्णमंजलवर्णन्यासं च कृत्वा कालनित्या विद्याध्यानं च कृ
त्वा नंदनं तरं वर्गद्वयस्याप्यादौ अंगविद्याजपांतं कृत्वा पारायणजपं कुर्यात् यथा॥ तारत्रयेन ल्लंक आइ ई हंसः। पुनः ता०
म्र० क का ई० पुनः ता० म्र० लंक ख आई० पुनः ता० म्र० लंक गा ई०। पुनः ता० म्र० क घा ई० ङ। इत्युक्तरीत्या कङा ई० इत्यंतं जप्त्वा
पुनः ता० म्र० का आई० पुनः ता० म्र० का का ई० पुनः ता० म्र० का खा ई० इति काङा ई० इत्यंतं जप्त्वा पुनः ता० म्र० कि आ
ई० पुनः ता० म्र० कि का ई० पुनः ता० म्र० कि खा ई० इति क्रमेण किङा ई इत्यंतं जप्त्वा॥ पुनः ता० म्र० की आई० पुनः ता० म्र० की
का ई० पुनः ता० म्र० की खा ई॥ इति क्रमेण कीङा ई इत्यंतं जपित्वा पुनः ता० म्र० कु कू कृ कॄ कॢ कॣ के कै को कौ कं कः पर्यं
तं जपित्वा पुनः ता० म्र० कः आई० पुनः ता० म्र० कः खा ई० पुनः ता० म्र० कः ङा ई इत्यंतं जपेत्। तदा मूलविद्यायाः षट्त्र्यु
त्तर पंचशत संख्याको जपो भवति। ततः गुरुपादुका विद्यां दीपिनी विद्यां उत्तीर्णविद्यां प्रार्थनी विद्यामपि जपित्वा
वर्गद्वयस्याप्यंते दत्तांघ्रिगीत्यादि स्तोत्रपाठं च कुर्यात्॥ कृतं जपं देव्यै समर्पयेत्॥ इति द्वितीयदिनकृत्यं॥ अथ तृ
तीयदिने ऋष्यादिकरषडंगन्यासं मातृकान्यासं पूर्णमंजलवर्णन्यासं च विधाय ध्यात्वा अंगविद्या जप्त्वा प्रापम्बा॥